चादसद्द्ये छत्रचामरवीथिभिः । सोमसूर्य्यसमाभासैश्शिविकायानमूर्त्तिभिः । दिष्टे शुभाय नृपतेर्निन्द्यमहिसमाकृति । श्वक्रव्यादनिभाकारं रणापसरकारणम् । धूमाभं पुष्पमिच्छन्ति मृत्यवेऽग्निभयाय च । कृष्णं पुष्पं तथा नेष्टं द्विषद्रोगविवर्द्धनम्” । इति पुष्पम्

‘भूखाग्न्यम्बुमरुज्जाता भवेच्छाया विषाणिनाम् । शस्ता भूजलवह्न्युत्था न शस्ता खानिलोद्भवा । छायायाः सम्भवः पूर्वं, परतः परितः प्रभा । छायायाः सम्भवः पूर्वं प्रभा तदुपरम्भुते । वर्णमात्राश्रिता च्छाया प्रभा वर्णस्य नाश्रयः । लक्षणानि तु नागानां पापानि च शुभानि च । छायावशात् फलन्त्येव छाया तेनातिलक्षणम् । यस्य स्यात्लक्षणं भद्रं छाया भद्रा भवेन्न तु । न चासौ शुभदो हस्ती छायोपहतलक्षणः । पापलक्षणयुक्तोऽपि शुभच्छायायुतो गजः । फलं लक्षणजं हित्वा छायाफलमवाप्नुयात् । नीराजनेऽभिषेके च ध्वजोच्छ्राये रणोदये । तेषु तेषु च कालेषु भवेच्छाया च शोभना । वक्षसि प्रतिमानेऽंसे कुम्भे कर्णे कटेषु च । निर्याणे मस्तकस्थाने वेष्टयोश्च कपोलयोः । पिण्डिकाजघनाभोगे तेषु तेषु पदेषु च । प्रदेशेषु प्रधानेषु छायाया वीक्षणं भवेत् । प्रशस्ता पार्थिवी छाया वह्निजा जलजापि च । नेष्यते व्योमजा छाया मातरिश्वभवापि च । पार्थिवी स्निग्धगम्भीरा सर्ववर्णे विभाव्यते । छाया ह्यासां च रक्ता च स्निग्धा जाम्बूनदाग्निजा । छाया नीलाम्बुदाभासा स्निग्धा सलिलसम्भवा । अव्यक्तपरुषा तस्य छाया गगनजा मता । धूम्रा रूक्षा च वायव्या भस्माभा निष्प्रभा तथा । एतास्छायाः परीक्ष्याः स्युर्मातङ्गे राजपूजिते । नीलाम्बुजेन्द्रनीलाभा नीलाञ्जननिभाऽपि च । काप्युक्ता पार्थिवी च्छाया सुभिक्षक्षेमकारिणी । बालार्कपद्मकिञ्जल्कशक्रगोपकसन्निभा । ज्वालाभा तप्तहेमाभा वह्निजा विजयप्रदा । छायाम्मयी पयःशङ्खकुन्दरूप्यनिभद्युतिः । सौम्याख्यया प्रतीता च भर्त्तुरर्थप्रदा सदा । जलबुद्बुदसङ्काशा धूम्रद्युतिरतिस्थिरा । निन्द्या च व्योमजा छायानित्योद्वेगकरी मता । सर्ववर्णैरुपेताऽपि निष्प्रभा भस्मसन्निभा । विच्छिन्ना विकृता च्छाया वायवी सा भयावहा । वैरिञ्ची वैष्णवी शैवी छाया माघवनी तथा । कौमारी राक्षसी सार्पी गान्धर्वी च तथाऽऽसुरी । पैशाची चेति यास्छाया स्छायादिव्याः क्वचित् शुभाः । भूतोत्थलक्षणे तासां भेदो नेह तु कीर्त्तितः । तेजोऽतिसक्ता भद्रस्य पाटला भवति प्रभा । छाया रक्तकला रूक्षपक्वपूगनिभाऽपि वा । कृष्णा च मन्दकरिणस्छाया तु मृगहस्तिनः । मलिनाम्बरधूम्रेव गीर्वाणायुधदर्शना” इति छाया ।

“हस्तिनां विविधा ध्वानाश्छिद्रेभ्यः करतोऽपि च । भवन्ति वायुवशतो गात्राणां वेष्टनेन च । प्रयाणेष्वभिषिक्तेषु ध्वजे जातिकुलेषु च । नागेषु बृंहितं ग्राह्यं मत्तस्तब्धे न जातिषु । क्षुधितोऽत्यस्तनिद्रान्तस्तृषितो बृंहति क्वचित् । यदि दन्ती शुभे देशे समये च वसुप्रदः । दर्शयेद्बृंहितं भद्रं तत्फलं स्फीतमादिशेत् । सरोवरे तथाऽऽरामे गोष्ठे विबुधवेश्मनि । निकुञ्जे हृद्यदेशे हि विज्ञेयः शुभदो ध्वनिः । यात्रायामभिषेके च यज्ञादिसमये तथा । समये चैव पुण्ये च बृंहितं स्याच्छिवप्रदम् । अश्मादिकाष्ठवल्मीकदुष्टस्थाने भयप्रदः । सुनीचे च प्रधूमे च प्रतिश्यायदिनेषु च । अतिशीतेऽतिघर्मे च प्रभाते चाशुभो रवः । भूतले न्यस्तहस्तो हि पर्य्यश्रुनयनो गजः । कूजन् निर्व्यथनं कुर्य्यात् यदि वा नश्यतीश्वरः । करेण बृंहितो नागो दुश्चित्तास्रुपरिप्लुतः । आदिशेन्मन्त्रिणो नाशमथ वा पृथनापतेः । व्यायतश्रमहस्तस्य शाखाधोगतचक्षुषः । जघने वामतो बालं तथा निक्षिपतोऽसकृत् । (बालं बालधिम्) । निषीदतो लङ्घयतो हृष्टरोम्णो विमूर्च्छतः । वामे निक्षिप्य गण्डूषं बृंहितं स्यादनर्थकृत् । खेभ्यः स्रवति नागानां धमतां यदि शोणितम् । (खेभ्यः छिद्रेभ्यः) तथा मन्यान्तदेशे च प्राणिनां क्षयमादिशेत् । यद्याग्नेयीमुखो भूत्वा प्राच्यां वाऽर्कोदयं प्रति । दन्ती तीक्ष्णरवं कुर्य्यात्तदा स्यात् पावकाद्भयम् । करेण यदि मातङ्गो बृंहमाणः स्तनं स्पृशेत् । आलाने लम्बमानस्तु संयुति क्षयमादिशेत् । (संयुति युद्धे) । आलाने लम्बमानस्तु शीत्कुर्वन् कुरुते ध्वनिम् । गात्रं प्रेङ्खोलयन्नागस्ततः प्रस्थानमादिशेत् । क्षिप्त्वा करं विषाणस्यं विषमं कूजते यदि । निरीक्षमाणो गगनं हतां दृष्टिमुदाहरेत् । यदाभ्युन्नतवक्त्रेण स्तनस्थानञ्च जिघ्रतः । तथा कुञ्चितहस्तेन मुखं गात्रं च जिघ्रतः । कुर्वतो दक्षिणं हस्तं शनैर्निक्षिपतोऽपि यत् । बृंहितं स्यात्तदिष्टञ्च तथान्योन्यकरस्पृशः । गृहीत्वा शुभवस्तूनि कुसुमादीनि चेद्द्विपः । कुर्य्याच्छब्दं शुभं तेन फलं शुभतरं भवेत् । उच्चैरभिमुखः शान्तो यदा नदति वारणः । अरुक्षमध्यमानेन तदा तत्र जयो ध्रुवः । सुखेन मण्डूकरवान् कर्णाभ्यां दुन्दुभिध्वनिम् । करेण मुरजारावान् कुर्वन् कल्याणकारकः । कलसादिसमारावा